

रत्नाकर उवाच
पतिव्रता प्रतिप्रणा पत्युः प्रियहिते रता।
देवीवदीदृशी भार्या हिन्दुनारी विशिष्यते।।

MAIN TOPICS :
हिन्दुनारी (Hindu Woman)
कवयः उचुः (The poets have said)
हिन्दुधर्मः पाठयति (Hindu dharma Teaches)

# हिन्दुनारी



रत्नाकर उवाच।

नरेभ्योऽपि परा नारी यत्र स्त्री वै विशिष्यते।
यस्मिन्देवीपदं नारीं हिन्दुधर्मः स उच्यते।।

गृहिणीं गृहलक्ष्मीं यो नारीं देवीं च मन्यते।
प्राणात्परा पदे पदे नरो हिन्दुः स उच्यते।।

जननी जन्मभूमिश्च स्वर्गादपि गरीयसे।
एकपत्नी सदाचारः सा हिन्दुसंस्कृतिर्खलु।।

मातृवत्परदाराणि परद्रव्याणि लोष्टवत्।
आत्मवत्सर्वभूतानि वीक्षन्ते हिन्दुधार्मिकाः।।

# कवयः उचुः।



नार्यो नरैर्हि पूज्यन्ते धान्यं यत्र सुसंचितम्।
दंपत्योः कलहो नास्ति श्रीस्तत्र स्वयमागता।।

श्रियः एताः स्त्रियो नाम सत्कार्याः भूतिमिच्छता।
पालिता स्नेहिता जाया स्त्री श्रीर्भवति भारत।।



गायत्र्यास्तु परन्नास्ति शोधनं पापकर्मणाम्।
गायंतं त्रायते यस्माद्गायत्री सा ततः स्मृता।।



पृथिव्यां पुत्रास्ते जननि बहवः सन्ति सरलाः।
परं तेषा मध्ये विरलतलोऽहं तव सुतः।
मदीयोऽयं त्यागः समुचितमिदं नो तव शिवे!
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति।।



अपि स्वर्णमयी लंका न मे लक्ष्मण रोचते।
जननी जन्मभूमिश्च स्वर्गादपिगरीयसी।



मातासमं नास्ति शरीरपोषणम् चिन्तासमं नास्ति शरीरषोषणम्।
मित्रं विना नास्ति शरीरतोषणं विद्यां विना नास्ति शरीरभूषणं।।

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवता।
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफला: क्रिया:।।



माता यस्य गृहे नास्ति भार्या वा गृहदेवता।
अरण्यं तेन गन्तव्यं यथाऽरंण्यं तथा गृहम्।।

उपाध्यायान्दशाचार्याचार्याणां शतं पिता।
सहस्रं तु पितृन्माता गौरवेणातिरिच्यते।।



जगन्मातर्मातस्तव चरणसेवा न रचिता न वा
दत्तं देवि द्रविणमपि भूयस्तव मया।
तथापि त्वं स्नेहं मयि निरुपमं यत्प्रकुरुषे कुपुत्रो।
जायेत क्वचिदपि कुमाता न भवति।।



न अन्नोदकसमं दानं न तिथिर्द्वादशीसमा।
न गायत्र्या: परो मन्त्रो न मातु: परदैवतम्।।

**हिन्दुधर्म: पाठयति नराणां भूषणं नरी –**
जाया तु अर्धं शरीरस्य नृणां धर्मादिसाधने।
नातस्तासु व्यथां कांचित्प्रतिकूलां समाचरेत्।।

स्त्रीयो हि नाम खल्वेता निसर्गादेव पण्डिता:।
पुरुषाणां तु पाण्डित्यं शास्त्रेणैवोपदिश्यते।।

न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते।
गृहं तु गृहिणीहिनमरण्यसदृशं मतम्।।

वृक्षमूलेऽपि दयिता यस्य तिष्ठति तद्गृहम्।
प्रासादोऽपि तया हीन: कान्तार इति निश्चितम्।।



यदा स वृद्धो भवति तदा भवति दु:खित:।
तदा शून्यं जगत्सत्यं यदा मात्रा वियुज्यते।।

विद्या मित्रं प्रवासेषु भार्या मित्रं गुहेषु च।
परलोके धनं धर्म: शीलं सर्वद्धा वै धनम्।।

जाया तु अर्धं शरीरस्य नृणां धर्मादिसाधने।
न अत: तासु व्यथां कांचित्प्रतिकूलां समाचरेत्।।

नास्ति भार्यासमो बंधु नास्ति भार्यासमा गति:।
नास्ति भार्यसमो लोके सहाय: धर्मसंग्रहे।।

नूनं हि ते कविवरा: विपरितवाच: ये नित्यमाहु: अबला इति कामिनी: ता:।
याभी: विलोलातरतादृष्टिपातै: शक्राद्योऽपि विजितास्त्वबला: कथं ता:।।

श्रिय एता: स्त्रियो नाम सकिार्यो भूतिमिच्छता।
पालिता निगृहिता च श्री: स्त्रि भवति भारत।।

सन्तुष्टो भार्यया भर्ता भर्त्रा भार्या तथैव च।
यस्मिन्नेव कुले नित्यं कल्याणं तत्र वै ध्रुवम्।।

पक्वान्नमिव राजेन्द्र सर्वसाधारणा: स्त्रिय:।
परोक्षे च समक्षे च रक्षितव्या: प्रयत्नत:।।

सूक्ष्मेभ्योऽपि प्रसंगेभ्यो रक्ष्या नार्यो हि सर्वदा।
द्वयोर्हि कुलयो: शोकमावहेयुररक्षिता।।

कान्तावियोग: स्वजनापमानं ऋणस्य शेष: कुजनस्य सेवा।
दारिद्र्यभावाद्विमुखाश्च मित्रा विनाग्नि पञ्च दहन्ति तीव्रा।।

संतुष्टो भार्यया भर्ता भर्ता भार्या तथैवच।
यस्मिन्नेवं कुले नित्यं कल्याणं तत्र वै ध्रुवम्।।

भार्या हि परमो ह्यर्थ: पुरुषस्येह पठ्यते।
असहायस्य लोकेऽस्मिँल्लोकयात्रासहायिनि।।

स्त्रीणाम्शिक्षितपटुत्वममानुषीषु।
संदृश्यते किमुत या: प्रतिबोधवत्य:।।

राजपत्नी गुरो: पत्नी भ्रतृपत्नी तथैव च।
पत्नीमाता स्वमाता च पञ्चैता मातर: स्मृता:।।

भार्या यस्य गृहे नित्यमतीव परिगर्विता।
तस्य लक्ष्मी: क्षयं याति कृष्णपक्षे यथा शशी।।